# ॥ શ્રીકૃષ્ણસહસ્રનામસ્તોત્ર ॥

.. shrIkRiShNasahasranAmastotra ..

sanskritdocuments.org

August 20, 2017

# .. shrIkRiShNasahasranAmastotra ..

# ॥ શ્રીકૃષ્ણસહસ્રનામસ્તોત્ર ॥

## Sanskrit Document Information

Text title : kRiShNasahasranAmastotra

File name : krishnasahasra.itx

Category : sahasranAma, vishhnu, krishna, stotra

Location : doc_vishhnu

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : WD/NA

Proofread by : Proofread by PSA EASWARAN psaeaswaran at gmail.com

Latest update : May 16, 2012, December 12, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીકૃષ્ણસહસ્રનામસ્તોત્ર ॥

શ્રીમદ્રુક્મિમહીપાલવંશરક્ષામણિઃ સ્થિરઃ ।
રાજા હરિહરઃ ક્ષોણીં રક્ષત્યમ્બુધિમેખલામ્ ।૧॥

સ રાજા સર્વતન્ત્રજ્ઞઃ સમભ્યર્ચ્ય વરપ્રદમ્ ।
દેવં શ્રિયઃ પતિં સ્તુત્યા સમસ્તૌદ્વેદવેદિતમ્ ॥ ૨॥

તસ્ય હૃષ્ટાશયઃ સ્તુત્યા વિષ્ણુર્ગોપાંગનાવૃતઃ ।
સ પિંછશ્યામલં રૂપં પિંછોત્તંસમદર્શયત્ ॥ ૩॥

સ પુનઃ સ્વાત્મવિન્યસ્તચિત્તં હરિહરં નૃપમ્ ।
અભિષિચ્ય કૃપાવર્ષૈરભાષત કૃતાંજલિમ્ ॥ ૪॥

શ્રીભગવાનુવાચ ।
મામવેહિ મહાભાગ  કૃષ્ણં કૃત્યવિદાં વર ।
પુરઃસ્થિતોઽસ્મિ ત્વદ્ભક્ત્યા પૂર્ણાસ્સન્તુ મનોરથાઃ ॥ ૫॥

સંરક્ષણાય શિષ્ટાનાં દુષ્ટાનાં શિક્ષણાય ચ ।
સમૃદ્ધ્યૈ વેદધર્માણાં મમાંશત્વમિહોદિતઃ ॥ ૬॥

રાજન્નામસહસ્રેણ રામો નામ્નાં સ્તુતસ્ત્વયા ।
સોઽહં સર્વવિદો તસ્માત્પ્રસન્નોઽસ્મિ વિશેષતઃ ॥ ૭॥

મામપિ ત્વં મહાભાગ મદીયચરિતાત્મના ।
સમ્પ્રીણય સહસ્રેણ નામ્નાં સર્વાર્થદાયિનામ્ ॥ ૮॥

પરાશરેણ મુનિના વ્યાસેનામ્નાયર્દશિના ।
સ્વાત્મભાજા શુકેનાપિ સૂક્તેઽપ્યેતદ્વિભાવિતમ્ ॥ ૯॥

તં હિ ત્વમનુસન્ધેહિ સહસ્રશિરસં પ્રભુમ્ ।
દત્તાન્યેષુ મયા ન્યસ્તં સહસ્રં રક્ષયિષ્યતિ ॥ ૧૦॥

ઇદં વિશ્વહિતાર્થાય રસનારંગગોચરમ્ ।
પ્રકાશય ત્વં મેદિન્યાં પરમાગમસમ્મતમ્ ॥ ૧૧॥

ઇદં શઠાય મૂર્ખાય નાસ્તિકાય વિકીર્ણિને ।
અસૂયિનેઽહિતાયાપિ ન પ્રકાશ્યં કદાચન ॥ ૧૨॥

વિવેકિને વિશુદ્ધાય વેદમાર્ગાનુસારિણે ।
આસ્તિકાયાત્મનિષ્ઠાય સ્વાત્મન્યનુસૃતોદયમ્ ॥ ૧૩॥

કૃષ્ણનામસહસ્રં વૈ કૃતધીરેતદીરયેત્ ।

વિનિયોગઃ
ૐ અસ્ય શ્રીકૃષ્ણસહસ્રનામસ્તોત્રમન્ત્રસ્ય પરાશરઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રીકૃષ્ણઃ પરમાત્મા દેવતા,
શ્રીકૃષ્ણેતિ બીજમ્, શ્રીવલ્લભેતિ શક્તિઃ, શાર્ઙ્ગીતિ કીલકં,
શ્રીકૃષ્ણપ્રીત્યર્થે જપે વિનિયોગઃ ॥

ન્યાસઃ
પરાશરાય ઋષયે નમઃ ઇતિ શિરસિ,
અનુષ્ટુપ્ છન્દસે નમઃ ઇતિ મુખે,
ગોપાલકૃષ્ણદેવતાયૈ નમઃ, ઇતિ હૃદયે,
શ્રીકૃષ્ણાય બીજાય નમઃ ઇતિ ગુહ્યે, શ્રીવલ્લભાય શક્ત્યૈ નમઃ ઇતિ
પાદયોઃ,
શાર્ઙ્ગધરાય કીલકાય નમઃ ઇતિ સર્વાંગે ॥

કરન્યાસઃ
શ્રીકૃષ્ણ ઇત્યારભ્ય શૂરવંશૈકધીરિત્યન્તાનિ અંગુષ્ઠાભ્યાં નમઃ ।
શૌરિરિત્યારભ્ય સ્વભાસોદ્ભાસિતવ્રજ ઇત્યન્તાનિ તર્જનીભ્યાં નમઃ ।
કૃતાત્મવિદ્યાવિન્યાસેત્યારભ્ય પ્રસ્થાનશકટારૂઢ ઇતિ મધ્યમાભ્યાં નમઃ,
વૃંદાવનકૃતાલય ઇત્યારભ્ય મધુરાજનવીક્ષિત ઇત્યાનામિકાભ્યાં નમઃ,
રજકપ્રતિઘાતક ઇત્યારભ્ય દ્વારકાપુરકલ્પન ઇતિ કનિષ્ઠિકાભ્યાં નમઃ
દ્વારકાનિલય ઇત્યારભ્ય પરાશર ઇતિ કરતલકરપૃષ્ઠાભ્યાં નમઃ,
એવં હૃદયાદિન્યાસઃ ॥

ધ્યાનમ્ ।
કેષાંચિત્પ્રેમપુંસાં વિગલિતમનસાં બાલલીલાવિલાસં
કેષાં ગોપાલલીલાઙ્કિતરસિકતનુર્વેણુવાદ્યેન દેવમ્ ।
કેષાં વામાસમાજે જનિતમનસિજો દૈત્યદર્પાપહૈવં
જ્ઞાત્વા ભિન્નાભિલાષં સ જયતિ જગતામીશ્વરસ્તાદૃશોઽભૂત્ ॥ ૧॥

ક્ષીરાબ્ધૌ કૃતસંસ્તવસ્સુરગણૈર્બ્રહ્માદિભિઃ પણ્ડિતૈઃ

પ્રોદ્ભૂતો વસુદેવસદ્મનિ મુદા ચિક્રીડ યો ગોકુલે ।
કંસધ્વંસકૃતે જગામ મધુરાં સારામસદ્વારકાં
ગોપાલોऽખિલગોપિકાજનસખઃ પાયાદપાયાત્ સ નઃ ॥ ૨॥

ફુલ્લેન્દીવરકાન્તિમિન્દુવદનં બર્હાવતંસપ્રિયં
શ્રીવત્સાઙ્કમુદારકૌસ્તુભધરં પીતામ્બરં સુન્દરમ્ ।
ગોપીનાં નયનોત્પલાર્ચિતતનું ગોગોપસંઘાવૃતં
ગોવિન્દં કલવેણુવાદનરતં દિવ્યાંગભૂષં ભજે ॥ ૩॥

ૐ

કૃષ્ણઃ શ્રીવલ્લભઃ શાર્ઙ્ગી વિષ્વક્સેનઃ સ્વસિદ્ધિદઃ ।
ક્ષીરોદધામા વ્યૂહેશઃ શેષશાયી જગન્મયઃ ॥ ૧॥

ભક્તિગમ્યઃ ત્રઈમૂર્તિર્ભારાર્તવસુધાસ્તુતઃ ।
દેવદેવો દયાસિન્ધુર્દેવદેવશિખામણિઃ ॥ ૨॥

સુખભાવસ્સુખાધારો મુકુન્દો મુદિતાશયઃ ।
અવિક્રિયઃ ક્રિયામૂર્તિરધ્યાત્મસ્વસ્વરૂપવાન્ ॥ ૩॥

શિષ્ટાભિલક્ષ્યો ભૂતાત્મા ધર્મત્રાણાર્થચેષ્ટિતઃ ।
અન્તર્યામી કલારૂપઃ કાલાવયવસાક્ષિકઃ ॥ ૪॥

વસુધાયાસહરણો નારદપ્રેરણોન્મુખઃ ।
પ્રભૂષ્ણુર્નારદોદ્ગીતો લોકરક્ષાપરાયણઃ ॥ ૫॥

રૌહિણેયકૃતાનન્દો યોગજ્ઞાનનિયોજકઃ ।
મહાગુહાન્તર્નિક્ષિપ્તઃ પુરાણવપુરાત્મવાન્ ॥ ૬॥

શૂરવંશૈકધીશ્શૌરિઃ કંસશંકાવિષાદકૃત્ ।
વસુદેવોલ્લસચ્છક્તિર્દેવક્યષ્ટમગર્ભગઃ ॥ ૭॥

વસુદેવસુતઃ શ્રીમાન્દેવકીનન્દનો હરિઃ ।
આશ્ચર્યબાલઃ શ્રીવત્સલક્ષ્મવક્ષાશ્ચતુર્ભુજઃ ॥ ૮॥

સ્વભાવોત્કૃષ્ટસદ્ભાવઃ કૃષ્ણાષ્ટમ્યન્તસમ્ભવઃ ।
પ્રાજાપત્યર્ક્ષસમ્ભૂતો નિશીથસમયોદિતઃ ॥ ૯॥

શંખચક્રગદાપદ્મપાણિઃ પદ્મનિભેક્ષણઃ ।

કિરીટી કૌસ્તુભોરસ્કઃ સ્ફુરન્મકરકુણ્ડલઃ ॥ ૧૦॥

પીતવાસા ઘનશ્યામઃ કુંચિતાંચિતકુન્તલઃ ।
સુવ્યક્તવ્યક્તાભરણઃ સૂતિકાગૃહભૂષણઃ ॥ ૧૧॥

કારાગારાન્ધકારઘ્નઃ પિતૃપ્રાગ્જન્મસૂચકઃ ।
વસુદેવસ્તુતઃ સ્તોત્રં તાપત્રયનિવારણઃ ॥ ૧૨॥

નિરવદ્યઃ ક્રિયામૂર્તિર્ન્યાયવાક્યનિયોજકઃ ।
અદૃષ્ટચેષ્ટઃ કૂટસ્થો ધૃતલૌકિકવિગ્રહઃ ॥ ૧૩॥

મહર્ષિમાનસોલ્લાસો મહીમંગલદાયકઃ ।
સન્તોષિતસુરવ્રાતઃ સાધુચિત્તપ્રસાદકઃ ॥ ૧૪॥

જનકોપાયનિર્દેષ્ટા દેવકીનયનોત્સવઃ ।
પિતૃપાણિપરિષ્કારો મોહિતાગારરક્ષકઃ ॥ ૧૫॥

સ્વશક્ત્યુદ્ધાટિતાશેષકપાટઃ પિતૃવાહકઃ ।
શેષોરગફણાચ્છત્રશ્શેષોક્તાખ્યાસહસ્રકઃ ॥ ૧૬॥

યમુનાપૂરવિધ્વંસી સ્વભાસોદ્ભાસિતવ્રજઃ ।
કૃતાત્મવિદ્યાવિન્યાસો યોગમાયાગ્રસમ્ભવઃ ॥ ૧૭॥

દુર્ગાનિવેદિતોદ્ભાવો યશોદાતલ્પશાયકઃ ।
નન્દગોપોત્સવસ્ફૂર્તિર્વ્રજાનન્દકરોદયઃ ॥ ૧૮॥

સુજાતજાતકર્મ શ્રીર્ગોપીભદ્રોક્તિનિર્વૃતઃ ।
અલીકનિદ્રોપગમઃ પૂતનાસ્તનપીડનઃ ॥ ૧૯॥

સ્તન્યાત્તપૂતનાપ્રાણઃ પૂતનાક્રોશકારકઃ ।
વિન્યસ્તરક્ષાગોધૂલિર્યશોદાકરલાલિતઃ ॥ ૨૦॥

નન્દાઘ્રાતશિરોમધ્યઃ પૂતનાસુગતિપ્રદઃ ।
બાલઃ પર્યંકનિદ્રાલુર્મુખાર્પિતપદાંગુલિઃ ॥ ૨૧॥

અંજનસ્નિગ્ધનયનઃ પર્યાયાંકુરિતસ્મિતઃ ।
લીલાક્ષસ્તરલાલોકશ્શકટાસુરભંજનઃ ॥ ૨૨॥

દ્વિજોદિતસ્વસ્ત્યયનો મંત્રપૂતજલાપ્લુતઃ ।
યશોદોત્સંગપર્યંકો યશોદામુખવીક્ષકઃ ॥ ૨૩॥

યશોદાસ્તન્યમુદિતસ્તૃણાવર્તાદિદુસ્સહઃ ।
તૃણાવર્તાસુરધ્વંસી માતૃવિસ્મયકારકઃ ॥ ૨૪॥

પ્રશસ્તનામકરણો જાનુચંક્રમણોત્સુકઃ ।
વ્યાલમ્બિચૂલિકારત્નો ઘોષગોપપ્રહર્ષણઃ ॥ ૨૫॥

સ્વમુખપ્રતિબિમ્બાર્થી ગ્રીવાવ્યાઘ્રનખોજ્જ્વલઃ ।
પંકાનુલેપરુચિરો માંસલોરૂકટીતટઃ ॥ ૨૬॥

ધૃષ્ટજાનુકરદ્વંદ્વઃ પ્રતિબિમ્બાનુકારકૃત્ ।
અવ્યક્તવર્ણવાગ્વૃત્તિઃ સ્મિતલક્ષ્યરદોદ્ગમઃ ॥ ૨૭॥

ધાત્રીકરસમાલમ્બી પ્રસ્ખલચ્ચિત્રચંક્રમઃ ।
અનુરૂપવયસ્યાઢ્યશ્ચારુકૌમારચાપલઃ ॥ ૨૮॥

વત્સપુચ્છસમાકૃષ્ટો વત્સપુચ્છવિકર્ષણઃ ।
વિસ્મારિતાન્યવ્યાપારો ગોપગોપીમુદાવહઃ ॥ ૨૯॥

અકાલવત્સનિર્મોક્તા વ્રજવ્યાક્રોશસુસ્મિતઃ ।
નવનીતમહાચોરો દારકાહારદાયકઃ ॥ ૩૦॥

પીઠોલૂખલસોપાનઃ ક્ષીરભાણ્ડવિભેદનઃ ।
શિક્યભાણ્ડસમાકર્ષી ધ્વાન્તાગારપ્રવેશકૃત્ ॥ ૩૧॥

ભૂષારત્નપ્રકાશાઢ્યો ગોપ્યુપાલમ્ભભર્ત્સિતઃ ।
પરાગધૂસરાકારો મૃદ્ભક્ષણકૃતેક્ષણઃ ॥ ૩૨॥

બાલોક્તમૃત્કથારમ્ભો મિત્રાન્તર્ગૂઢવિગ્રહઃ ।
કૃતસન્ત્રાસલોલાક્ષો જનનીપ્રત્યયાવહઃ ॥ ૩૩।
માતૃદૃશ્યાત્તવદનો વક્ત્રલક્ષ્યચરાચરઃ ।
યશોદાલાલિતસ્વાત્મા સ્વયં સ્વાચ્છન્દ્યમોહનઃ ॥ ૩૪॥

સવિત્રીસ્નેહસંશ્લિષ્ટઃ સવિત્રીસ્તનલોલુપઃ ।
નવનીતાર્થનાપ્રહ્વો નવનીતમહાશનઃ ॥ ૩૫॥

મૃષાકોપપ્રકમ્પોષ્ઠો ગોષ્ઠાંગણવિલોકનઃ ।
દધિમન્થઘટીભેત્તા કિંકિણીક્વણસૂચિતઃ ॥ ૩૬॥

હૈયંગવીનરસિકો મૃષાશ્રુશ્ચૌર્યશંકિતઃ ।
જનનીશ્રમવિજ્ઞાતા દામબન્ધનિયંત્રિતઃ ॥ ૩૭॥

દામાકલ્પશ્ચલાપાંગો ગાઢોલૂખલબન્ધનઃ ।
આકૃષ્ટોલૂખલોઽનન્તઃ કુબેરસુતશાપવિત્ ॥। ૩૮॥

નારદોક્તિપરામર્શી યમલાર્જુનભંજનઃ ।
ધનદાત્મજસંઘુષ્ટો નન્દમોચિતબન્ધનઃ ॥ ૩૯॥

બાલકોદ્ગીતનિરતો બાહુક્ષેપોદિતપ્રિયઃ ।
આત્મજ્ઞો મિત્રવશગો ગોપીગીતગુણોદયઃ ॥ ૪૦॥

પ્રસ્થાનશકટારૂઢો વૃન્દાવનકૃતાલયઃ ।
ગોવત્સપાલનૈકાગ્રો નાનાક્રીડાપરિચ્છદઃ ॥ ૪૧॥

ક્ષેપણીક્ષેપણપ્રીતો વેણુવાદ્યવિશારદઃ ।
વૃષવત્સાનુકરણો વૃષધ્વનિવિડમ્બનઃ ॥ ૪૨॥

નિયુદ્ધલીલાસંહૃષ્ટઃ કૂજાનુકૃતકોકિલઃ ।
ઉપાત્તહંસગમનસ્સર્વજન્તુરુતાનુકૃત્ ॥ ૪૩॥

ભૃંગાનુકારી દધ્યન્નચોરો વત્સપુરસ્સરઃ ।
બલી બકાસુરગ્રાહી બકતાલુપ્રદાહકઃ ॥ ૪૪॥

ભીતગોપાર્ભકાહૂતો બકચંચુવિદારણઃ ।
બકાસુરારિર્ગોપાલો બાલો બાલાદ્ભુતાવહઃ ॥ ૪૫॥

બલભદ્રસમાશ્લિષ્ટઃ કૃતક્રીડાનિલાયનઃ ।
ક્રીડાસેતુનિધાનજ્ઞઃ પ્લવંગોત્પ્લવનોઽદ્ભુતઃ ॥ ૪૬॥

કન્દુકક્રીડનો લુપ્તનન્દાદિભવવેદનઃ ।
સુમનોઽલંકૃતશિરાઃ સ્વાદુસ્નિગ્ધાન્નશિક્યભૃત્ ॥ ૪૭॥

ગુંજાપ્રાલમ્બનચ્છન્નઃ પિંછૈરલકવેષકૃત્ ।
વન્યાશનપ્રિયઃ શૃંગરવાકારિતવત્સકઃ ॥ ૪૮॥

મનોજ્ઞપલ્લવોત્તંસપુષ્પસ્વેચ્છાત્તષટ્પદઃ ।
મંજુશિંજિતમંજીરચરણઃ કરકંકણઃ ॥ ૪૯॥

અન્યોન્યશાસનઃ કીડાપટુઃ પરમકૈતવઃ ।

પ્રતિધ્વાનપ્રમુદિતઃ શાખાચતુરચંક્રમઃ ॥ ૫૦॥

અઘદાનવસંહર્તા વ્રજવિઘ્નવિનાશનઃ ।
વ્રજસંજીવનઃ શ્રેયોનિધિર્દાનવમુક્તિદઃ ॥ ૫૧॥

કાલિન્દીપુલિનાસીનસ્સહભુક્તવ્રજાર્ભકઃ ।
કક્ષાજઠરવિન્યસ્તવેણુર્વલ્લવચેષ્ટિતઃ ॥ ૫૨॥

ભુજસન્ધ્યન્તરન્યસ્તશૃંગવેત્રઃ શુચિસ્મિતઃ ।
વામપાણિસ્થદધ્યન્નકબલઃ કલભાષણઃ ॥ ૫૩॥

અંગુલ્યન્તરવિન્યસ્તફલઃ પરમપાવનઃ ।
અદૃશ્યતર્ણકાન્વેષી વલ્લવાર્ભકભીતિહા ॥ ૫૪॥

અદૃષ્ટવત્સપવ્રાતો બ્રહ્મવિજ્ઞાતવૈભવઃ ।
ગોવત્સવત્સપાન્વેષી વિરાટ્-પુરુષવિગ્રહઃ ॥ ૫૫॥

સ્વસંકલ્પાનુરૂપાર્થો વત્સવત્સપરૂપધૃક્ ।
યથાવત્સક્રિયારૂપો યથાસ્થાનનિવેશનઃ ॥ ૫૬॥

યથાવ્રજાર્ભકાકારો ગોગોપીસ્તન્યપસ્સુખી ।
ચિરાદ્બલોહિતો દાન્તો બ્રહ્મવિજ્ઞાતવૈભવઃ ॥ ૫૭॥

વિચિત્રશક્તિર્વ્યાલીનસૃષ્ટગોવત્સવત્સપઃ ।
બ્રહ્મત્રપાકરો ધાતૃસ્તુતસ્સર્વાર્થસાધકઃ ॥ ૫૮॥

બ્રહ્મ બ્રહ્મમયોઽવ્યક્તસ્તેજોરૂપસ્સુખાત્મકઃ ।
નિરુક્તં વ્યાકૃતિર્વ્યક્તો નિરાલમ્બનભાવનઃ ॥ ૫૯॥

પ્રભવિષ્ણુરતન્ત્રીકો દેવપક્ષાર્થરૂપધૃક્ ।
અકામસ્સર્વવેદાદિરણીયસ્થૂલરૂપવાન્ ॥ ૬૦॥

વ્યાપી વ્યાપ્યઃ કૃપાકર્તા વિચિત્રાચારસમ્મતઃ ।
છન્દોમયઃ પ્રધાનાત્મા મૂર્તામૂર્તિદ્વયાકૃતિઃ ॥ ૬૧॥

અનેકમૂર્તિરક્રોધઃ પરઃ પ્રકૃતિરક્રમઃ ।
સકલાવરણોપેતસ્સર્વદેવો મહેશ્વરઃ ॥ ૬૨॥

મહાપ્રભાવનઃ પૂર્વવત્સવત્સપદર્શકઃ ।
કૃષ્ણયાદવગોપાલો ગોપાલોકનહર્ષિતઃ ॥ ૬૩॥

સ્મિતેક્ષાહર્ષિતબ્રહ્મા ભક્તવત્સલવાક્પ્રિયઃ ।
બ્રહ્માનન્દાશ્રુધૌતાંઘ્રિર્લીલાવૈચિત્ર્યકોવિદઃ ॥ ૬૪॥

બલભદ્રૈકહૃદયો નામાકારિતગોકુલઃ ।
ગોપાલબાલકો ભવ્યો રજ્જુયજ્ઞોપવીતવાન્ ॥ ૬૫॥

વૃક્ષચ્છાયાહતાશાન્તિર્ગોપોત્સંગોપબર્હણઃ ।
ગોપસંવાહિતપદો ગોપવ્યજનવીજિતઃ ॥૬૬।
ગોપગાનસુખોન્નિદ્રઃ શ્રીદામાર્જિતસૌહૃદઃ ।
સુનન્દસુહૃદેકાત્મા સુબલપ્રાણરંજનઃ ॥ ૬૭॥

તાલીવનકૃતક્રીડો બલપાતિતધેનુકઃ ।
ગોપીસૌભાગ્યસમ્ભાવ્યો ગોધૂલિચ્છુરિતાલકઃ ॥ ૬૮॥

ગોપીવિરહસન્તપ્તો ગોપિકાકૃતમજ્જનઃ ।
પ્રલમ્બબાહુરુત્ફુલ્લપુણ્ડરીકાવતંસકઃ ॥ ૬૯॥

વિલાસલલિતસ્મેરગર્ભલીલાવલોકનઃ ।
સ્રગ્ભૂષણાનુલેપાઢ્યો જનન્યુપહૃતાન્નભુક્ ॥ ૭૦॥

વરશય્યાશયો રાધાપ્રેમસલ્લાપનિર્વૃતઃ ।
યમુનાતટસંચારી વિષાર્તવ્રજહર્ષદઃ ॥ ૭૧॥

કાલિયક્રોધજનકઃ વૃદ્ધાહિકુલવેષ્ટિતઃ ।
કાલિયાહિફણારંગનટઃ કાલિયમર્દનઃ ॥ ૭૨॥

નાગપત્નીસ્તુતિપ્રીતો નાનાવેષસમૃદ્ધિકૃત્ ।
અવિષ્વક્તદૃગાત્મેશઃ ખદૃગાત્મસ્તુતિપ્રિયઃ ॥ ૭૩॥

સર્વેશ્વરસ્સર્વગુણઃ પ્રસિદ્ધસ્સર્વસાત્વતઃ ।
અકુંઠધામા ચન્દ્રાર્કદૃષ્ટિરાકાશનિર્મલઃ ॥ ૭૪॥

અનિર્દેશ્યગતિર્નાગવનિતાપતિભૈક્ષદઃ ।
સ્વાંઘ્રિમુદ્રાંકનાગેન્દ્રમૂર્ધા કાલિયસંસ્તુતઃ ॥ ૭૫॥

અભયો વિશ્વતશ્ચક્ષુઃ સ્તુતોત્તમગુણઃ પ્રભુઃ ।
અહમાત્મા મરુત્પ્રાણઃ પરમાત્મા દ્યુશીર્ષવાન્ ॥ ૭૬॥

નાગોપાયનહૃષ્ટાત્મા હ્રદોત્સારિતકાલિયઃ ।
બલભદ્રસુખાલાપો ગોપાલિંગનનિર્વૃતઃ ॥ ૭૭॥

દાવાગ્નિભીતગોપાલગોપ્તા દાવાગ્નિનાશનઃ ।
નયનાચ્છાદનક્રીડાલમ્પટો નૃપચેષ્ટિતઃ ॥ ૭૮॥

કાકપક્ષધરસ્સૌમ્યો બલવાહકકેલિમાન્ ।
બલઘાતિતદુર્ધર્ષપ્રલમ્બો બલવત્સલઃ ॥ ૭૯॥

મુઞ્જાટવ્યગ્નિશમનઃ પ્રાવૃટ્કાલવિનોદવાન્ ।
શિલાન્યસ્તાન્નભૃદ્દૈત્યસંહર્તા શાદ્વલાસનઃ ॥ ૮૦॥

સદાપ્તગોપિકોદ્ગીતઃ કર્ણિકારાવતંસકઃ ।
નટવેષધરઃ પદ્મમાલાંકો ગોપિકાવૃતઃ ॥ ૮૧॥

ગોપીમનોહરાપાંગો વેણુવાદનતત્પરઃ ।
વિન્યસ્તવદનામ્ભોજશ્ચારુશબ્દકૃતાનનઃ ॥ ૮૨॥

બિમ્બાધરાર્પિતોદારવેણુર્વિશ્વવિમોહનઃ ।
વ્રજસંવર્ણિતશ્રાવ્યવેણુનાદઃ શ્રુતિપ્રિયઃ ॥ ૮૩॥

ગોગોપગોપીજન્મેપ્સુર્બ્રહ્મેન્દ્રાદ્યભિવન્દિતઃ ।
ગીતસ્નુતિસરિત્પૂરો નાદનર્તિતબર્હિણઃ ॥ ૮૪॥

રાગપલ્લવિતસ્થાણુર્ગીતાનમિતપાદપઃ ।
વિસ્મારિતતૃણગ્રાસમૃગો મૃગવિલોભિતઃ ॥ ૮૫॥

વ્યાઘ્રાદિહિંસ્રસહજવૈરહર્તા સુગાયનઃ ।
ગાઢોદીરિતગોવૃન્દપ્રેમોત્કર્ણિતતર્ણકઃ ॥ ૮૬॥

નિષ્પન્દયાનબ્રહ્માદિવીક્ષિતો વિશ્વવન્દિતઃ ।
શાખોત્કર્ણશકુન્તૌઘશ્છત્રાયિતબલાહકઃ ॥ ૮૭॥

પ્રસન્નઃ પરમાનન્દશ્ચિત્રાયિતચરાચરઃ ।
ગોપિકામદનો ગોપીકુચકુંકુમમુદ્રિતઃ ॥ ૮૮॥

ગોપિકન્યાજલક્રીડાહૃષ્ટો ગોપ્યંશુકાપૃહત્ ।
સ્કન્ધારોપિતગોપસ્ત્રગ્વાસાઃ કુન્દનિભસ્મિતઃ ॥ ૮૯॥

ગોપીનેત્રોત્પલશશી ગોપિકાયાચિતાંશુકઃ ।

ગોપીનમસ્ક્રિયાદેષ્ટા ગોપ્યેકકરવન્દિતઃ ॥ ૯૦॥

ગોપ્યંજલિવિશેષાર્થી ગોપક્રીડાવિલોભિતઃ ।
શાન્તવાસસ્ફુરદ્ગોપીકૃતાંજલિરઘાપહઃ ॥ ૯૧॥

ગોપીકેલિવિલાસાર્થી ગોપીસમ્પૂર્ણકામદઃ ।
ગોપસ્ત્રીઈવસ્ત્રદો ગોપીચિત્તચોરઃ કુતૂહલી ॥ ૯૨॥

વૃન્દાવનપ્રિયો ગોપબન્ધુર્યજ્વાન્નયાચિતા ।
યજ્ઞેશો યજ્ઞભાવજ્ઞો યજ્ઞપત્ન્યભિવાઞ્છિતઃ ॥ ૯૩॥

મુનિપત્નીવિતીર્ણાન્નતૃપ્તો મુનિવધૂપ્રિયઃ ।
દ્વિજપત્ન્યભિભાવજ્ઞો દ્વિજપત્નીવરપ્રદઃ ॥ ૯૪॥

પ્રતિરુદ્ધસતીમોક્ષપ્રદો દ્વિજવિમોહિતા ।
મુનિજ્ઞાનપ્રદો યજ્વસ્તુતો વાસવયાગવિત્ ॥ ૯૫॥

પિતૃપ્રોક્તક્રિયારૂપશક્રયાગનિવારણઃ ।
શક્રાઽમર્ષકરશ્શક્રવૃષ્ટિપ્રશમનોન્મુખઃ ॥ ૯૬॥

ગોવર્ધનધરો ગોપગોવૃન્દત્રાણતત્પરઃ ।
ગોવર્ધનગિરિછત્રચંડદંડભુજાર્ગલઃ ॥ ૯૭॥

સપ્તાહવિધૃતાદ્રીન્દ્રો મેઘવાહનગર્વહા ।
ભુજાગ્રોપરિવિન્યસ્તક્ષ્માધરક્ષ્માભૃદચ્યુતઃ ॥ ૯૮॥

સ્વસ્થાનસ્થાપિતગિરિર્ગોપીદધ્યક્ષતાર્ચિતઃ ।
સુમનસ્સુમનોવૃષ્ટિહૃષ્ટો વાસવવન્દિતઃ ॥ ૯૯॥

કામધેનુપયઃપૂરાભિષિક્તસ્સુરભિસ્તુતઃ ।
ધરાંઘ્રિરોષધીરોમા ધર્મગોપ્તા મનોમયઃ ॥ ૧૦૦॥

જ્ઞાનયજ્ઞપ્રિયશ્શાસ્ત્રનેત્રસ્સર્વાર્થસારથિઃ ।
ઐરાવતકરાનીતવિયદ્ગંગાપ્લુતો વિભુઃ ॥ ૧૦૧॥

બ્રહ્માભિષિક્તો ગોગોપ્તા સર્વલોકશુભંકરઃ ।
સર્વવેદમયો મગ્નનન્દાન્વેષિપિતૃપ્રિયઃ ॥ ૧૦૨॥

વરુણોદીરિતાત્મેક્ષાકૌતુકો વરુણાર્ચિતઃ ।
વરુણાનીતજનકો ગોપજ્ઞાતાત્મવૈભવઃ ॥ ૧૦૩॥

સ્વર્લોકાલોકસંહૃષ્ટગોપવર્ગત્રિવર્ગદઃ ।
બ્રહ્મહૃદ્ગોપિતો ગોપદ્રષ્ટા બ્રહ્મપદપ્રદઃ ॥ ૧૦૪॥

શરચ્ચન્દ્રવિહારોત્કઃ શ્રીપતિર્વશકો ક્ષમઃ ।
ભયાપહો ભર્તૃરુદ્ધગોપિકાધ્યાનગોચરઃ ॥ ૧૦૫॥

ગોપિકાનયનાસ્વાદ્યો ગોપીનર્મોક્તિનિર્વૃતઃ ।
ગોપિકામાનહરણો ગોપિકાશતયૂથપઃ ॥ ૧૦૬॥

વૈજયન્તીસ્રગાકલ્પો ગોપિકામાનવર્ધનઃ ।
ગોપકાન્તાસુનિર્દેષ્ટા કાન્તો મન્મથમન્મથઃ ॥ ૧૦૭॥

સ્વાત્માસ્યદત્તતામ્બૂલઃ ફલિતોત્કૃષ્ટયૌવનઃ ।
વલ્લવીસ્તનસક્તાક્ષો વલ્લવીપ્રેમચાલિતઃ ॥ ૧૦૮॥

ગોપીચેલાંચલાસીનો ગોપીનેત્રાબ્જષટ્પદઃ ।
રાસક્રીડાસમાસક્તો ગોપીમણ્ડલમણ્ડનઃ ॥ ૧૦૯॥

ગોપીહેમમણિશ્રેણિમધ્યેન્દ્રમણિરુજ્જ્વલઃ ।
વિદ્યાધરેન્દુશાપઘ્નશ્શંખચૂડશિરોહરઃ ॥ ૧૧૦॥

શંખચૂડશિરોરત્નસમ્પ્રીણિતબલોઽનઘઃ ।
અરિષ્ટારિષ્ટકૃદ્દુષ્ટકેશિદૈત્યનિષૂદનઃ ॥ ૧૧૧॥

સરસસ્સસ્મિતમુખસ્સુસ્થિરો વિરહાકુલઃ ।
સંકર્ષણાર્પિતપ્રીતિરક્રૂરધ્યાનગોચરઃ ॥ ૧૧૨॥

અક્રૂરસંસ્તુતો ગૂઢો ગુણવૃત્ત્યુપલક્ષિતઃ ।
પ્રમાણગમ્યસ્તન્માત્રાઽવયવી બુદ્ધિતત્પરઃ ॥ ૧૧૩॥

સર્વપ્રમાણપ્રમધીસ્સર્વપ્રત્યયસાધકઃ ।
પુરુષશ્ચ પ્રધાનાત્મા વિપર્યાસવિલોચનઃ ॥ ૧૧૪॥

મધુરાજનસંવીક્ષ્યો રજકપ્રતિઘાતકઃ ।
વિચિત્રામ્બરસંવીતો માલાકારવરપ્રદઃ ॥ ૧૧૫॥

કુબ્જાવક્રત્વનિર્મોક્તા કુબ્જાયૌવનદાયકઃ ।
કુબ્જાંગરાગસુરભિઃ કંસકોદણ્ડખણ્ડનઃ ॥ ૧૧૬॥

ધીરઃ કુવલયાપીડમર્દનઃ કંસભીતિકૃત્ ।
દન્તિદન્તાયુધો રંગત્રાસકો મલ્લયુદ્ધવિત્ ॥ ૧૧૭॥

ચાણૂરહન્તા કંસારિર્દેવકીહર્ષદાયકઃ ।
વસુદેવપદાનમ્રઃ પિતૃબન્ધવિમોચનઃ ॥ ૧૧૮॥

ઉર્વીભયાપહો ભૂપ ઉગ્રસેનાધિપત્યદઃ ।
આજ્ઞાસ્થિતશચીનાથસ્સુધર્માનયનક્ષમઃ ॥ ૧૧૯॥

આદ્યો દ્વિજાતિસત્કર્તા શિષ્ટાચારપ્રદર્શકઃ ।
સાન્દીપનિકૃતાભ્યસ્તવિદ્યાભ્યાસૈકધીસ્સુધીઃ ॥ ૧૨૦॥

ગુર્વભીષ્ટક્રિયાદક્ષઃ પશ્ચિમોદધિપૂજિતઃ ।
હતપંચજનપ્રાપ્તપાંચજન્યો યમાર્ચિતઃ ॥ ૧૨૧॥

ધર્મરાજજયાનીતગુરુપુત્ર ઉરુક્રમઃ ।
ગુરુપુત્રપ્રદશ્શાસ્તા મધુરાજસભાસદઃ ॥ ૧૨૨॥

જામદગ્ન્યસમભ્યર્ચ્યો ગોમન્તગિરિસંચરઃ ।
ગોમન્તદાવશમનો ગરુડાનીતભૂષણઃ ॥ ૧૨૩॥

ચક્રાદ્યાયુધસંશોભી જરાસન્ધમદાપહઃ ।
સૃગાલાવનિપાલઘ્નસ્સૃગાલાત્મજરાજ્યદઃ ॥ ૧૨૪॥

વિધ્વસ્તકાલયવનો મુચુકુન્દવરપ્રદઃ ।
આજ્ઞાપિતમહામ્ભોધિર્દ્વારકાપુરકલ્પનઃ ॥ ૧૨૫॥

દ્વારકાનિલયો રુક્મિમાનહન્તા યદૂદ્વહઃ ।
રુચિરો રુક્મિણીજાનિઃ પ્રદ્યુમ્નજનકઃ પ્રભુઃ ॥ ૧૨૬॥

અપાકૃતત્રિલોકાર્તિરનિરુદ્ધપિતામહઃ ।
અનિરુદ્ધપદાન્વેષી ચક્રી ગરુડવાહનઃ ॥ ૧૨૭॥

બાણાસુરપુરીરોદ્ધા રક્ષાજ્વલનયન્ત્રજિત્ ।
ધૂતપ્રમથસંરમ્ભો જિતમાહેશ્વરજ્વરઃ ॥ ૧૨૮॥

ષટ્ચક્રશક્તિનિર્જેતા ભૂતવેતાલમોહકૃત્ ।
શમ્ભુત્રિશૂલજિચ્છમ્ભુજૃમ્ભણશ્શંમ્ભુસંસ્તુતઃ ॥ ૧૨૯॥

ઇન્દ્રિયાત્મેન્દુહૃદયસ્સર્વયોગેશ્વરેશ્વરઃ ।

હિરણ્યગર્ભહૃદયો મોહાવર્તનિવર્તનઃ ॥ ૧૩૦॥

આત્મજ્ઞાનનિધિર્મેધા કોશસ્તન્માત્રરૂપવાન્ ।
ઇન્દ્રોઽગ્નિવદનઃ કાલનાભસ્સર્વાગમાધ્વગઃ ॥ ૧૩૧॥

તુરીયસર્વધીસાક્ષી દ્વન્દ્વારામાત્મદૂરગઃ ।
અજ્ઞાતપારો વશ્યશ્રીરવ્યાકૃતવિહારવાન્ ॥ ૧૩૨॥

આત્મપ્રદીપો વિજ્ઞાનમાત્રાત્મા શ્રીનિકેતનઃ ।
બાણબાહુવનચ્છેત્તા મહેન્દ્રપ્રીતિવર્ધનઃ ॥ ૧૩૩॥

અનિરુદ્ધનિરોધજ્ઞો જલેશાહૃતગોકુલઃ ।
જલેશવિજયી વીરસ્સત્રાજિદ્રત્નયાચકઃ ॥ ૧૩૪॥

પ્રસેનાન્વેષણોદ્યુક્તો જામ્બવદ્ધૃતરત્નદઃ ।
જિતર્ક્ષરાજતનયાહર્તા જામ્બવતીપ્રિયઃ ॥ ૧૩૫॥

સત્યભામાપ્રિયઃ કામશ્શતધન્વશિરોહરઃ ।
કાલિન્દીપતિરક્રૂરબન્ધુરક્રૂરરત્નદઃ ॥ ૧૩૬॥

કૈકેયીરમણો ભદ્રાભર્તા નાગ્નજિતીધવઃ ।
માદ્રીમનોહરશ્શૈબ્યાપ્રાણબન્ધુરુરુક્રમઃ ॥ ૧૩૭॥

સુશીલાદયિતો મિત્રવિન્દાનેત્રમહોત્સવઃ ।
લક્ષ્મણાવલ્લભો રુદ્ધપ્રાગ્જ્યોતિષમહાપુરઃ ॥ ૧૩૮॥

સુરપાશાવૃતિચ્છેદી મુરારિઃ ક્રૂરયુદ્ધવિત્ ।
હયગ્રીવશિરોહર્તા સર્વાત્મા સર્વદર્શનઃ ॥ ૧૩૯॥

નરકાસુરવિચ્છેત્તા નરકાત્મજરાજ્યદઃ ।
પૃથ્વીસ્તુતઃ પ્રકાશાત્મા હૃદ્યો યજ્ઞફલપ્રદઃ ॥ ૧૪૦॥

ગુણગ્રાહી ગુણદ્રષ્ટા ગૂઢસ્વાત્મા વિભૂતિમાન્ ।
કવિર્જગદુપદ્રષ્ટા પરમાક્ષરવિગ્રહઃ ॥ ૧૪૧॥

પ્રપન્નપાલનો માલી મહદ્ બ્રહ્મવિવર્ધનઃ ।
વાચ્યવાચકશક્ત્યર્થસ્સર્વવ્યાકૃતસિદ્ધિદઃ ॥ ૧૪૨॥

સ્વયંપ્રભુરનિર્વેદ્યસ્સ્વપ્રકાશશ્ચિરન્તનઃ ।
નાદાત્મા મન્ત્રકોટીશો નાનાવાદનિરોધકઃ ॥ ૧૪૩॥

કન્દર્પકોટિલાવણ્યઃ પરાર્થૈકપ્રયોજકઃ ।
અમરીકૃતદેવૌઘઃ કન્યકાબન્ધમોચનઃ ॥ ૧૪૪॥

ષોડશસ્ત્રીસહસ્રેશઃ કાન્તઃ કાન્તામનોભવઃ ।
ક્રીડારત્નાચલાહર્તા વરુણચ્છત્રશોભિતઃ ॥ ૧૪૫॥

શક્રાભિવન્દિતશ્શક્રજનનીકુણ્ડલપ્રદઃ ।
અદિતિપ્રસ્તુતસ્તોત્રો બ્રાહ્મણોદ્ઘુષ્ટચેતનઃ ॥ ૧૪૬॥

પુરાણસ્સંયમી જન્માલિપ્તઃ ષડ્વિંશકોઽર્થદઃ ।
યશસ્યનીતિરાદ્યન્તરહિતસ્સત્કથાપ્રિયઃ ॥ ૧૪૭॥

બ્રહ્મબોધઃ પરાનન્દઃ પારિજાતાપહારકઃ ।
પૌણ્ડ્રકપ્રાણહરણઃ કાશિરાજનિષૂદનઃ ॥ ૧૪૮॥

કૃત્યાગર્વપ્રશમનો વિચક્રવધદીક્ષિતઃ ।
કંસવિધ્વંસનસ્સામ્બજનકો ડિમ્ભકાર્દનઃ ॥ ૧૪૯॥

મુનિર્ગોપ્તા પિતૃવરપ્રદસ્સવનદીક્ષિતઃ ।
રથી સારથ્યનિર્દેષ્ટા ફાલ્ગુનઃ ફાલ્ગુનિપ્રિયઃ ॥ ૧૫૦॥

સપ્તાબ્ધિસ્તમ્ભનોદ્ભાતો હરિસ્સપ્તાબ્ધિભેદનઃ ।
આત્મપ્રકાશઃ પૂર્ણશ્રીરાદિનારાયણેક્ષિતઃ ॥ ૧૫૧॥

વિપ્રપુત્રપ્રદશ્ચૈવ સર્વમાતૃસુતપ્રદઃ ।
પાર્થવિસ્મયકૃત્પાર્થપ્રણવાર્થપ્રબોધનઃ ॥ ૧૫૨॥

કૈલાસયાત્રાસુમુખો બદર્યાશ્રમભૂષણઃ ।
ઘણ્ટાકર્ણક્રિયામૌઢ્યાત્તોષિતો ભક્તવત્સલઃ ॥ ૧૫૩॥

મુનિવૃન્દાદિભિર્ધ્યેયો ઘણ્ટાકર્ણવરપ્રદઃ ।
તપશ્ચર્યાપરશ્ચીરવાસાઃ પિંગજટાધરઃ ॥ ૧૫૪॥

પ્રત્યક્ષીકૃતભૂતેશશ્શિવસ્તોતા શિવસ્તુતઃ ।
કૃષ્ણાસ્વયંવરાલોકકૌતુકી સર્વસમ્મતઃ ॥ ૧૫૫॥

બલસંરમ્ભશમનો બલદર્શિતપાણ્ડવઃ ।
યતિવેષાર્જુનાભીષ્ટદાયી સર્વાત્મગોચરઃ ॥ ૧૫૬॥

સુભદ્રાફાલ્ગુનોદ્વાહકર્તા પ્રીણિતફાલ્ગુનઃ ।
ખાણ્ડવપ્રીણિતાર્ચિષ્માન્મયદાનવમોચનઃ ॥ ૧૫૭॥

સુલભો રાજસૂયાર્હયુધિષ્ઠિરનિયોજકઃ ।
ભીમાર્દિતજરાસન્ધો માગધાત્મજરાજ્યદઃ ॥ ૧૫૮॥

રાજબન્ધનનિર્મોક્તા રાજસૂયાગ્રપૂજનઃ ।
ચૈદ્યાદ્યસહનો ભીષ્મસ્તુતસ્સાત્વતપૂર્વજઃ ॥ ૧૫૯॥

સર્વાત્માર્થસમાહર્તા મન્દરાચલધારકઃ ।
યજ્ઞાવતારઃ પ્રહ્લાદપ્રતિજ્ઞાપ્રતિપાલકઃ ॥ ૧૬૦॥

બલિયજ્ઞસભાધ્વંસી દૃપ્તક્ષત્રકુલાન્તકઃ ।
દશગ્રીવાન્તકો જેતા રેવતીપ્રેમવલ્લભઃ ॥ ૧૬૧॥

સર્વાવતારાધિષ્ઠાતા વેદબાહ્યવિમોહનઃ ।
કલિદોષનિરાકર્તા દશનામા દૃઢવ્રતઃ ॥ ૧૬૨॥

અમેયાત્મા જગત્સ્વામી વાગ્મી ચૈદ્યશિરોહરઃ ।
દ્રૌપદીરચિતસ્તોત્રઃ કેશવઃ પુરુષોત્તમઃ ॥ ૧૬૩॥

નારાયણો મધુપતિર્માધવો દોષવર્જિતઃ ।
ગોવિન્દઃ પુણ્ડરીકાક્ષો વિષ્ણુશ્ચ મધુસૂદનઃ ॥ ૧૬૪॥

ત્રિવિક્રમસ્ત્રિલોકેશો વામનઃ શ્રીધરઃ પુમાન્ ।
હૃષીકેશો વાસુદેવઃ પદ્મનાભો મહાહ્રદઃ ॥ ૧૬૫॥

દામોદરશ્ચતુર્વ્યૂહઃ પાંચાલીમાનરક્ષણઃ ।
સાલ્વઘ્નસ્સમરશ્લાઘી દન્તવક્ત્રનિબર્હણઃ ॥ ૧૬૬॥

દામોદરપ્રિયસખા પૃથુકાસ્વાદનપ્રિયઃ ॥

ઘૃણી દામોદરઃ શ્રીદો ગોપીપુનરવેક્ષકઃ ॥ ૧૬૭॥

ગોપિકામુક્તિદો યોગી દુર્વાસસ્તૃપ્તિકારકઃ ।
અવિજ્ઞાતવ્રજાકીર્ણપાણ્ડવાલોકનો જયી ॥ ૧૬૮॥

પાર્થસારથ્યનિરતઃ પ્રાજ્ઞઃ પાણ્ડવદૂત્યકૃત્ ।
વિદુરાતિથ્યસન્તુષ્ટઃ કુન્તીસન્તોષદાયકઃ ॥ ૧૬૯॥

સુયોધનતિરસ્કર્તા દુર્યોધનવિકારવિત્ ।
વિદુરાભિષ્ટુતો નિત્યો વાર્ષ્ણેયો મંગલાત્મકઃ ॥ ૧૭૦॥

પંચવિંશતિતત્વેશશ્ચતુર્વિંશતિદેહભાક્ ।
સર્વાનુગ્રાહકસ્સર્વદાશાર્હસતતાર્ચિતઃ ॥ ૧૭૧॥

અચિન્ત્યો મધુરાલાપસ્સાધુદર્શી દુરાસદઃ ।
મનુષ્યધર્માનુગતઃ કૌરવેન્દ્રક્ષયેક્ષિતા ॥ ૧૭૨॥

ઉપેન્દ્રો દાનવારાતિરુરુગીતો મહાદ્યુતિઃ ।
બ્રહ્મણ્યદેવઃ શ્રુતિમાન્ ગોબ્રાહ્મણહિતાશયઃ ॥ ૧૭૩॥

વરશીલશ્શિવારમ્ભસ્સુવિજ્ઞાનવિમૂર્તિમાન્ ।
સ્વભાવશુદ્ધસ્સન્મિત્રસ્સુશરણ્યસ્સુલક્ષણઃ ॥ ૧૭૪॥

ધૃતરાષ્ટ્રગતોદૃષ્ટિપ્રદઃ કર્ણવિભેદનઃ ।
પ્રતોદધૃગ્વિશ્વરૂપવિસ્મારિતધનંજયઃ ॥ ૧૭૫॥

સામગાનપ્રિયો ધર્મધેનુર્વર્ણોત્તમોઽવ્યયઃ ।
ચતુર્યુગક્રિયાકર્તા વિશ્વરૂપપ્રદર્શકઃ ॥ ૧૭૬॥

બ્રહ્મબોધપરિત્રાતપાર્થો ભીષ્માર્થચક્રભૃત્ ।
અર્જુનાયાસવિધ્વંસી કાલદંષ્ટ્રાવિભૂષણઃ ॥ ૧૭૭॥

સુજાતાનન્તમહિમા સ્વપ્નવ્યાપારિતાર્જુનઃ ।
અકાલસન્ધ્યાઘટનશ્ચક્રાન્તરિતભાસ્કરઃ ॥ ૧૭૮॥

દુષ્ટપ્રમથનઃ પાર્થપ્રતિજ્ઞાપરિપાલકઃ ।
સિન્ધુરાજશિરઃપાતસ્થાનવક્તા વિવેકદૃક્ ॥ ૧૭૯॥

સુભદ્રાશોકહરણો દ્રોણોત્સેકાદિવિસ્મિતઃ ।
પાર્થમન્યુનિરાકર્તા પાણ્ડવોત્સવદાયકઃ ॥ ૧૮૦॥

અંગુષ્ઠાક્રાન્તકૌન્તેયરથશ્શક્તોઽહિશીર્ષજિત્ ।
કાલકોપપ્રશમનો ભીમસેનજયપ્રદઃ ॥ ૧૮૧॥

અશ્વત્થામવધાયાસત્રાતપાણ્ડુસુતઃ કૃતી ।
ઇષીકાસ્ત્રપ્રશમનો દ્રૌણિરક્ષાવિચારણઃ ।૧૮૨॥

પાર્થાપહારિતદ્રૌણિચૂડામણિરભંગુરઃ ।

ધૃતરાષ્ટ્રપરામૃષ્ટભીમપ્રતિકૃતિસ્મયઃ ॥ ૧૮૩॥

ભીષ્મબુદ્ધિપ્રદશ્શાન્તશ્શરચ્ચન્દ્રનિભાનનઃ ।
ગદાગ્રજન્મા પાંચાલીપ્રતિજ્ઞાપરિપાલકઃ ॥ ૧૮૪॥

ગાન્ધારીકોપદૃગ્ગુપ્તધર્મસૂનુરનામયઃ ।
પ્રપન્નાર્તિભયચ્છેત્તા ભીષ્મશલ્યવ્યથાવહઃ ॥ ૧૮૫॥

શાન્તશ્શાન્તનવોદીર્ણસર્વધર્મસમાહિતઃ ।
સ્મારિતબ્રહ્મવિદ્યાર્થપ્રીતપાર્થો મહાસ્ત્રવિત્ ॥ ૧૮૬॥

પ્રસાદપરમોદારો ગાંગેયસુગતિપ્રદઃ ।
વિપક્ષપક્ષક્ષયકૃત્પરીક્ષિત્પ્રાણરક્ષણઃ ॥ ૧૮૭॥

જગદ્ગુરુર્ધર્મસૂનોર્વાજિમેધપ્રવર્તકઃ ।
વિહિતાર્થાપ્તસત્કારો માસકાત્પરિવર્તદઃ ॥ ૧૮૮॥

ઉત્તંકહર્ષદાત્મીયદિવ્યરૂપપ્રદર્શકઃ ।
જનકાવગતસ્વોક્તભારતસ્સર્વભાવનઃ ॥ ૧૮૯॥

અસોઢયાદવોદ્રેકો વિહિતાપ્તાદિપૂજનઃ ॥

સમુદ્રસ્થાપિતાશ્ચર્યમુસલો વૃષ્ણિવાહકઃ ॥ ૧૯૦॥

મુનિશાપાયુધઃ પદ્માસનાદિત્રિદશાર્થિતઃ ।
વૃષ્ટિપ્રત્યવહારોત્કસ્સ્વધામગમનોત્સુકઃ ॥ ૧૯૧॥

પ્રભાસાલોકનોદ્યુક્તો નાનાવિધનિમિત્તકૃત્ ।
સર્વયાદવસંસેવ્યસ્સર્વોત્કૃષ્ટપરિચ્છદઃ ॥ ૧૯૨॥

વેલાકાનનસંચારી વેલાનિલહૃતશ્રમઃ ।
કાલાત્મા યાદવોઽનન્તસ્સ્તુતિસન્તુષ્ટમાનસઃ ॥ ૧૯૩॥

દ્વિજાલોકનસન્તુષ્ટઃ પુણ્યતીર્થમહોત્સવઃ ।
સત્કારાહ્લાદિતાશેષભૂસુરસ્સુરવલ્લભઃ ॥ ૧૯૪॥

પુણ્યતીર્થાપ્લુતઃ પુણ્યઃ પુણ્યદસ્તીર્થપાવનઃ ।
વિપ્રસાત્કૃતગોકોટિશ્શતકોટિસુવર્ણદઃ ॥ ૧૯૫॥

સ્વમાયામોહિતાઽશેષવૃષ્ણિવીરો વિશેષવિત્ ।

જલજાયુધનિર્દેષ્ટા સ્વાત્માવેશિતયાદવઃ ॥ ૧૯૬॥

દેવતાભીષ્ટવરદઃ કૃતકૃત્યઃ પ્રસન્નધીઃ ।
સ્થિરશેષાયુતબલસ્સહસ્રફણિવીક્ષણઃ ॥ ૧૯૭॥

બ્રહ્મવૃક્ષવરચ્છાયાસીનઃ પદ્માસનસ્થિતઃ ।
પ્રત્યગાત્મા સ્વભાવાર્થઃ પ્રણિધાનપરાયણઃ ॥ ૧૯૮॥

વ્યાધેષુવિદ્ધપૂજ્યાંઘ્રિર્નિષાદભયમોચનઃ ।
પુલિન્દસ્તુતિસન્તુષ્ટઃ પુલિન્દસુગતિપ્રદઃ ॥ ૧૯૯॥

દારુકાર્પિતપાર્થાદિકરણીયોક્તિરીશિતા ।
દિવ્યદુન્દુભિસંયુક્તઃ પુષ્પવૃષ્ટિપ્રપૂજિતઃ ॥ ૨૦૦॥

પુરાણઃ પરમેશાનઃ પૂર્ણભૂમા પરિષ્ટુતઃ ।
પતિરાદ્યઃ પરં બ્રહ્મ પરમાત્મા પરાત્પરઃ ॥ ૨૦૧॥

શ્રીપરમાત્મા પરાત્પરઃ ઓં નમઃ ઇતિ-

ફલશ્રુતિઃ
ઇદં સહસ્રં કૃષ્ણસ્ય નામ્નાં સર્વાર્થદાયકમ્ ।
અનન્તરૂપી ભગવાન્ વ્યાખ્યાતાદૌ સ્વયમ્ભુવે ॥ ૨૦૨॥

તેન પ્રોક્તં વસિષ્ઠાય તતો લબ્ધ્વા પરાશરઃ ।
વ્યાસાય તેન સમ્પ્રોક્તં શુકો વ્યાસાદવાપ્તવાન્ ॥ ૨૦૩॥

તચ્છિષ્યૈર્બહુભિર્ભૂમૌ ખ્યાપિતં દ્વાપરે યુગે ।
કૃષ્ણાજ્ઞયા હરિહરઃ કલૌ પ્રખ્યાપયદ્વિભુઃ ॥ ૨૦૪॥

ઇદં પઠતિ ભક્ત્યા યઃ શૃણોતિ ચ સમાહિતઃ ।
સ્વસિદ્ધ્યૈ પ્રાર્થયન્ત્યેનં તીર્થક્ષેત્રાદિદેવતાઃ ॥ ૨૦૫॥

પ્રાયશ્ચિત્તાન્યશેષાણિ નાલં યાનિ વ્યપોહિતુમ્ ।
તાનિ પાપાનિ નશ્યન્તિ સકૃદસ્ય પ્રશંસનાત્ ॥ ૨૦૬॥

ઋણત્રયવિમુક્તસ્ય શ્રૌતસ્માર્તાનુવર્તિનઃ ।
ઋષેસ્ત્રિમૂર્તિરૂપસ્ય ફલં વિન્દેદિદં પઠન્ ॥ ૨૦૭॥

ઇદં નામસહસ્રં યઃ પઠત્યેતચ્છૃણોતિ ચ ।
શિવલિંગસહસ્રસ્ય સ પ્રતિષ્ઠાફલં લભેત્ ॥ ૨૦૮॥

ઇદં કિરીટી સંજપ્ય જયી પાશુપતાસ્ત્રભાક્ ।
કૃષ્ણસ્ય પ્રાણભૂતસ્સન્ કૃષ્ણં સારથિમાપ્તવાન્ ॥ ૨૦૯॥

દ્રૌપદ્યા દમયન્ત્યા ચ સાવિત્ર્યા ચ સુશીલયા ।
દુરિતાનિ જિતાન્યેતજ્જપાદાપ્તં ચ વાઞ્છિતમ્ ॥ ૨૧૦॥

કિમિદં બહુના શંસન્માનવો મોદનિર્ભરઃ ।
બ્રહ્માનન્દમવાપ્યાન્તે કૃષ્ણસાયૂજ્યમાપ્નુયાત્ ॥ ૨૧૧॥

॥ ઇતિ કૃષ્ણસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીવિષ્ણુધર્મોત્તરતઃ

Proofread by PSA EASWARAN psaeaswaran at gmail.com

.. shrIkRiShNasahasranAmastotra ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*